संस्कृतवार्ता:

दिनाङ्क: - 19/12/2024 सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

मुख्यवार्ताः

- संसदभवनस्य परिसरे शान्तिपूर्ण-विरोधस्य समये भाजपेति दलस्य द्वौ सांसदौ व्रणितौ, काङ्ग्रेसदलस्य नेतु: राहुलगान्धिन: विरुद्धं आक्रमणस्य, उद्दीपनस्य च विषये भाजपादलं दिल्ली-आरक्षकान् प्रति परिवादं दत्तवान्, काङ्ग्रेस्-दलमपि भाजपा-दलस्य विरुद्धं परिवादं दत्तवान्।
- डा. बी. आर्. अम्बेडकर् वर्यस्य विषये केन्द्रीय-गृहमन्त्रिणः अमितशाहस्य कथनविषये कोलाहलस्य मध्ये संसदः उभे सदने स्थगिते।
- जम्मू-कश्मीर्-राज्यस्य कुलगाम-मण्डले सुरक्षासेनया सह दुरा पादिते संघर्षे पञ्च आतंकवादीन: मारिता: ।
- केंद्रीयरेलविभाग: अग्रिमे मासे प्रयागराजनगरे महाकुंभमेलापकस्य दृष्ट्या चतुस्त्रिंशत् विशेषरेलयानानि चालयति।
- क्रिकेट्-क्रीडायां, आई. सी. सी. इत्यनेन सप्तविंशत्यधिक द्विसहस्र तमवर्षपर्यन्तं तटस्थ-स्थानेषु भारत-पाकिस्तान्-देशयोः क्रीडायाः पुष्टिः कृत:।

-----------------------------------

भाजपा-विपक्ष:

भाजपा विपक्षदलयो: सदस्यानां विरोध-प्रतिरोधयोः मध्ये अद्य संसदभवनस्य सङ्कुले भाजपा दलस्य सांसदौ प्रतापसारङ्गी, मुकेशराजपूतौ च घातितौ। वार्ताहरैः सह वार्तालापं कुर्वन् श्रीसारङ्गी आक्षिप्तवान् यत् लोकसभायां विपक्षनेता राहुलगान्धी एकं सांसदं भारपूर्वकम् कर्षण म् कृतवान यः तस्य उपरि पतितः तदनन्तरं सः घातितः। सः अवदत् यत् सः सोपानस्य समीपे स्थितः आसीत् यदा श्रीगान्धी आगतः। सूत्रानुसारी प्रधानमन्त्री नरेन्द्रमोदी आहतान् सांसदान्

आहूय तेषां स्वास्थ्यस्य विषये पृष्टवान्। संसदीयकार्याणां मन्त्री किरेन् रिजिजुः अस्याः घटनायाः निन्दां कृतवान् । श्रीगान्धिनः नेतृत्वे काङ्ग्रेस-सांसदाः भाजपायाः-सांसदानाम् उपरि आक्रमणं कृतवन्तः इति सः आक्षिप्तवान् । सः काङ्ग्रेसस्य वरिष्ठनेतुः शारीरिकशक्तिप्रयोगेन आचरणं प्रति आक्षेपं कृतवान् ।

राहुलगान्धिना उक्तं यत् यदा सः संसदस्य अन्तः गन्तुं प्रयतमानोऽभवत् तदा भाजपासांसदाः तं निवारयितुं प्रयतन्ते स्म। तेषां कृते सः बलस्य प्रयोगं कृतवान्, तर्जितः च इति उक्तवान् । तेनोक्तं यत् एतत् प्रवेशद्वारं अस्ति, तस्मै सदनस्य अन्तः गन्तुं अधिकारः अस्ति।

संसदस्य प्रवेशे बाधां कुर्वन्तः सत्तारूढ दलस्य सांसदाः लोकसभा अध्यक्षेण निर्गतनिर्देशानां उल्लङ्घनं कृतवन्तः इति काङ्ग्रेसस्य सांसदः शशि थरूरः अवदत्। सः अवदत् यत् कोऽपि सदस्यः प्रवेशद्वारं अवरुद्धुं न अर्हति। राज्यसभायां काँग्रेसनेता मल्लिकार्जुनखर्गे आरोपितवान् यत् सः भाजपा-सांसदैः शारीरिकरूपेण दुरोत्सारितवान् इति। सः लोकसभा अध्यक्षाय ओम बिरला इत्यस्मै पत्रं लिखित्वा अस्य घटनायाः अन्वेषणं कर्तुं आग्रहं कृतवान् अस्ति।

संसदस्य बहिः वार्ताहरैः सह वार्तालापं कुर्वन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः काङ्ग्रेसपक्षे प्रहारं कृतवान्। सः अवदत् काङ्ग्रेसः संसदस्य गौरवं न्यूनीकरोति इति आरोपितवान् ।

संसदभवनस्य परिसरे शान्तिपूर्ण-विरोधस्य समये भाजपेति दलस्य द्वौ सांसदौ व्रणितौ, काङ्ग्रेसदलस्य नेतुः राहुलगान्धिनः विरुद्धं आक्रमणस्य, उद्दीपनस्य च विषये भाजपादलं दिल्ली-आरक्षकान् प्रति परिवादं दत्तवान्, काङ्ग्रेस्-दलमपि भाजपा-दलस्य विरुद्धं परिवादं दत्तवान्।

-----------------------------------

<u>केन्द्रीयगृहमन्त्रिणा</u>

केन्द्रीयगृहमन्त्रिणा अमितशाहेन डॉ. बी.आर.अम्बेडकरस्य उपरि कृत-टिप्पण्याः प्रकरणे लोकसभायां यदा सदने दिवसस्य आरम्भे समागमः अभवत् तदा काङ्ग्रेस, डी.एम.के., समाजवादी पार्टी चेत्यादयः विपक्षी दलानां नेतारः केन्द्रीयगृहमन्त्रिणः टिप्पण्याः विरुद्धं प्रदर्शनम् आरब्धवन्तः। केचन विरोधं कुर्वन्तः सदस्याः सदनस्य केन्द्रे प्रविष्टवन्तः । प्रदर्शनस्य मध्ये सभापतिः ओम- बिरला सदनम् अपराह्णे द्विवादन-पर्यन्तं स्थगितवान्। राज्यसभायाम्

अपि एतादृशाः दृश्याः आसन् । यदा दिवसस्य सदने समागमः अभवत् तदा अध्यक्षः जगदीपधनखडः श्रीशाहस्य टिप्पण्याः अन्यविषयाणां च विषये विपक्षस्य सांसदैः प्रस्तावितानि स्थगनसूचनानि अस्वीकृतवन्तः। काङ्ग्रेस, डी.एम.के., आम-आदमी-पार्टी, समाजवादी-पार्टी, राजद, वाम, आदि विपक्षीय सदस्याः गृहमन्त्रिणः विरुद्धं कोलाहलं कृतवन्तः। अध्यक्षः सदनस्य कार्यजातस्य आग्रहं कृतवान्, परन्तु व्यर्थः एव आसीत् । पश्चात् सः सदनं अपराह्णे द्वि-वादनपर्यन्तं स्थगितवान् ।

------------------------------------

<u>जम्मू-कश्मीरे</u>

जम्मू-कश्मीरे अद्य प्रातः दक्षिणकश्मीरस्य कुलगाममण्डले सुरक्षाबलैः सह जाते आतङ्कवादविरोधि-सङ्घर्षे पञ्च आतङ्कवादिनः मारिताः। सेनाप्रवक्ता अवदत्, द्वौ सैनिकौ अपि घातितौ, एतौ चिकित्सारतौ स्तः। गतरात्रौ आतङ्कवादिनः उपस्थितेः विषये विशिष्टसूचनायाः आधारेण क्षेत्रे अन्वेषणकार्यक्रमं च आरब्धम्। सुरक्षासूत्रानुसारी यदा संयुक्तबलानि कादर ग्रामे शंकित-स्थानस्य समीपं प्राप्तवन्तः तदा निगूढाः आतङ्कवादिनः भुशुण्डीकया प्रहारं कृतवन्तः। सेनाप्रवक्ता प्रोक्तवान् यत् मृत आतङ्कवादिनां परिचयः निश्चीयते।

------------------------------------

<u>उत्तरप्रदेशस्य</u>

उत्तरप्रदेशस्य प्रयागराजनगरे महाकुम्भमेलके यात्रियातायातस्य अपेक्षितस्य आगामिन: वृद्धे : प्रबन्धनार्थं केन्द्रीयरेलवेविभागेन चतुस्त्रिंशत् विशेषरेलयानानि चालयितुं योजना घोषिता। मेलकं प्रयागराजे त्रयोदश जनवरीतः षड्विंशतिः फरवरी मास पर्यन्तं भविष्यति।विशेषरेलयानानि मुम्बई, पुणे, नागपुर, इत्यादिभ्यः विविधनगरेभ्यः प्रस्थास्यन्ति येन आयोजने तीर्थयात्रिणां कृते सुचारुतया कुशलतया च यात्रा सुनिश्चिता भविष्यति। कुम्भमेलापकं विशिष्ट रेलयानानां आरक्षणं दिसम्बर विंशतिः दिनांकात् सर्वेषु पीआरएस इत्येषु केन्द्रेषु तथा च अन्तर्जालपटले <u>www.irctc.co.in</u> इत्यत्र उद्घाट्यते।

------------------------------------

<u>एकं राष्ट्रमेकं निर्वाचनम्</u>

प्रशासनमद्य एकं राष्ट्रम् एकं निर्वाचनमिति निर्वाचनेन सम्बद्धानि विधेयकानि संयुक्त-संसदीय-समितये प्रेषयिष्यति। यस्मिन् एकत्रिंशत्-सांसदा: सम्मिलिता: भविष्यन्ति। अपरत्र अस्यां समित्यां एकविंशति-लोकसभाया: सदस्या: दश राज्यसभासदस्या: च सम्मिलिता: सन्तीति। सांसदेषु भाजपेतिदलस्य नेतार: पी.पी.चौधरी-अनुरागसिंहठाकुर-पुरूषोत्तमभाई रूपाला इत्येते अपि च काङ्ग्रेसदलस्य प्रियङ्कागांधी-मनीष तिवारी, टी.एम्. सी. इत्सस्य दलस्य कल्याणबनर्जी, एन.सी.पी. इति दलस्य सुप्रिया-सुले: च सम्मिलिता:।

------------------------------------

<u>केन्द्रीयस्वास्थ्यसचिवः</u>

पुण्य सलिला श्रीवास्तवः प्रोक्तवती यत् देशस्य जनसांख्यिकीयलाभांशस्य सदुपयोगाय, नवाचारं वर्धयितुं, सतत-प्रगतिं च सुनिश्चेतुं सशक्त-स्वास्थ्य-सेवासु, गुणवत्तापूर्ण-शिक्षा-व्यवस्थासु च निवेशस्य अत्यावश्यकता वर्तते। नवदिल्ल्यां वार्षिक-स्वास्थ्य-शिखर-सम्मेलनं सम्बोधयन्त्या सुश्री श्रीवास्तवः प्रोक्तवती यत् भारतस्य स्वास्थ्य-सेवा-कार्यक्रमः प्रत्येकस्य नागरिकस्य कृते स्वास्थ्यसेवां अल्पमूल्यं, सुलभं, समावेशी च कर्तुं केन्द्रितः अस्ति। सा उद्योगिनः क्षयरोग-मुक्त-भारतस्य सर्वकारीयलक्ष्ये योगदानं दातुं अपि प्रोक्तवती।

------------------------------------

<u>अरुणाचलप्रदेशे</u>

अरुणाचलप्रदेशे मार्गविकासपरियोजनानां कृते केन्द्रेण प्रायः चतुश्शतं कोटिरूप्यकाणि विनियोजितानि सन्ति। एकस्मिन् सामाजिकान्तर्जालीय संदेशे पथपरिवहनराजमार्गमन्त्रीणा नितिनगडकरीणा उक्तं यत् चतुर्विंशत्यधिक द्विसहस्र-पञ्चविंशत्यधिक द्विसहस्रतमवर्षयोः मध्ये केन्द्रीयमार्गमूलसंरचनाकोषस्य अन्तर्गतं ऊनविंशतिः राज्यमण्डलमार्गविकासपरियोजनानां कृते कोषः आवंटितः अस्ति। सः अवदत् यत्, एतेषां उपक्रमाणाम् उद्देश्यं सीमक्षेत्रेषु अन्तिम-सीम-

संपर्कं वर्धयितुं, निर्विघ्न-प्रवेशस्य सौविध्यानि कर्तुं, राज्ये सर्वत्र सामाजिकार्थिक-वृद्धिं पोषयितुं चास्ति।

-----------------------------------

<u>क्रिकेट्</u>

क्रिकेट्-क्रीडायां, आई. सी. सी. इत्यनेन सप्तविंशत्यधिक द्विसहस्र  तमवर्षपर्यन्तं तटस्थ-स्थानेषु भारत-पाकिस्तान्-देशयोः क्रीडायाः पुष्टिः कृत:।

।।इति वार्ता:।।